*To* EXPATRIATE, *v.a.* प्रवस् in caus. (-वासयति -यितुं), विवस्, स्वदेशाद् वहिष्कृ or दूरीकृ or निराकृ or निःसृ in caus. (-सारयति -यितुं), देशान्तरीकृ.

EXPATRIATED, *p.p.* प्रवासितः -ता -तं, विवासितः -ता -तं, स्वदेशवहिष्कृतः -ता -तं.

EXPATRIATION, *s.* प्रवासः -सनं, विवासनं, प्रव्राजनं, स्वदेशवहिष्करणं.

*To* EXPECT, *v. a.* प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल् (c. 10. -पालयति -यितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, उद्दृश् (c. 1. -पश्यति -द्रष्टुं).

*To* EXPECT, *v. n.* प्रतीक्षां कृ, प्रत्याशां कृ, प्रतीक्षी -क्षिणी -क्षि भू.

EXPECTABLE, *a.* अपेक्ष्यः -क्ष्या -क्ष्यं, अपेक्षणीयः -या -यं, प्रतीक्ष्यः -क्ष्या -क्ष्यं.

EXPECTANT, *a.* प्रतीक्षी -क्षिणी -क्षि (न्), प्रतीक्षकः -का -कं, अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं, व्यपेक्षः -क्षा -क्षं, प्रत्याशी -शिनी -शि (न्), आकांक्षी -क्षिणी -क्षि (न्), सप्रत्याशः -शा -शं, अर्थी -र्थिनी -र्थि (न्).

EXPECTATION, *s.* अपेक्षा, प्रतीक्षा -क्षणं, व्यपेक्षा, उदीक्षणं, सम्प्रतीक्षा, निरीक्षा, प्रत्याशा, आशा, व्यपाश्रयः, अभिनन्दा; 'in expectation,' अपेक्षया.

EXPECTED, *p. p.* अपेक्षितः -ता -तं, प्रतीक्षितः -ता -तं, आकांक्षितः -ता -तं, चित्तकलितः -ता -तं; 'to be expected,' अपेक्षणीयः -या -यं, आकांक्षणीयः -या -यं.

*To* EXPECTORATE, *v. a.* श्लेष्माणं or श्लेष्मकं निरस् (c. 4. -अस्यति -असितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं) or मुखाद् निःसृ in caus. (-सारयति -यितुं), श्लेष्मनिरसनं कृ, निष्ठीव् (c. 1. -ष्ठीवति -ष्ठेवितुं), उत्कास् (c. 1. -कासते -सितुं).

EXPECTORATED, *p.p.* निष्ठ्यूतः -ता -तं, मुखनिरस्तः -स्ता -स्तं, मुखनिःसारितः -ता -तं.

EXPECTORATION, *s.* श्लेष्मनिरसनं, निष्ठ्यूतिः *f.*, निष्ठेवनं, उत्कासनं, श्लेष्मोत्क्षेपः.

EXPECTORATIVE *a.* श्लेष्मवर्धकः -का -कं, कफवर्धकः -का -कं, कफकरः -री -रं.

EXPEDIENCE, EXPEDIENCY. *s.* युक्तता, युक्तिः *f.*, योग्यता, उपयुक्तत्वं, उपयोगिता, उपयोगः, औचित्यं, उपपत्तिः *f.*, याथातथ्यं, याथार्थ्यं, सफलता, सोपकारत्वं, सार्थत्वं.

EXPEDIENT, *a.* उपयोगी -गिनी -गि (न्), उपयुक्तः -क्ता -क्तं, सोपकारः -रा -रं, अर्थयुक्तः -क्ता -क्तं, अर्थकरः -री -रं, सार्थकः -का -कं, हितः -ता -तं, योग्यः -ग्या -ग्यं, उपकारकः -का -कं, सफलः -ला -लं.

EXPEDIENT, *s.* (Means) उपायः, अभ्युपायः, गतिः *f.*, साधनं, कर्म्मसाधनं, गुणः, अङ्गं, विधानं, उपकरणं, सम्भवः, योगः, उपपत्तिः *f.*, उपक्रमः. The six expedients of defence are सन्धिः, विग्रहः, यानं, आसनं, द्वैधं, आश्रयः. The four expedients for reducing an enemy are भेदः, दण्डः, साम, दानं.

EXPEDIENTLY, *adv.* युक्तं, यथायोग्यं, यथोचितं, सोपकारं, सफलं, स्थाने.

*To* EXPEDITE, *v. a.* त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्, त्वरितं or सत्वरं कृ or विधा (c. 3. -दधाति -धातुं), or सम्पद् in caus. (-पादयति -यितुं) or साध् (c. 10. साधयति -यितुं) or प्रवृत् in caus. -वर्त्तयति -यितुं), क्षेप (nom. क्षेपयति -यितुं), शीघ्र (nom. शीघ्रयति -यितुं). —(Despatch) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं).

EXPEDITED, *p.p.* त्वरितं कृतः -ता -तं or सम्पादितः -ता -तं, वेगितः -ता -तं.

EXPEDITION, *s.* (Haste, speed) त्वरा, तूर्णिः *f.*, सत्वरता, त्वरणं, शीघ्रता, शैघ्र्यं, क्षिप्रता, द्रुतत्वं, वेगः -गिता, आवेगः, जवः, प्रजवः, लघुता, लाघवं, अविलम्बः, उद्योगः, क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरितगतिः *f.*, शीघ्रगमनं, आशुगमनं.—(March of an army, &c.) प्रस्थानं, प्रयाणं, यानं, गमनं, गतिः *f.*, यात्रा, अभिषेणनं, अभिनिर्याणं.—(Enterprise) प्रवृत्तिः *f.*, उपक्रमः.

EXPEDITIOUS, *a.* त्वरितः -ता -तं, सत्वरः -रा -रं, त्वरावान् -वती -वत् (त्), त्वरान्वितः -ता -तं, शीघ्रः -घ्रा -घ्रं, क्षिप्रः -प्रा -प्रं, शीघ्रकारी -रिणी -रि (न्), क्षिप्रकारी &c., अविलम्बः -म्बा -म्बं -म्बी -म्बिनी -म्बि (न्), अविलम्बितः -ता -तं, अप्रलम्बः -म्बा -म्बं, द्रुतः -ता -तं, लघुः -घुः -घु, वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), जवी -विनी -वि (न्), तूर्णः -र्णा -र्णं, धावकः -का -कं, अदीर्घसूत्रः -त्रा -त्रं, शीघ्रगामी -मिनी -मि (न्), त्वरितगतिः -तिः -ति; 'being expeditious,' शीघ्रायमाणः -णा -णं, त्वरमाणः -णा -णं.

EXPEDITIOUSLY, *adv.* त्वरितं, सत्वरं, क्षिप्रं, शीघ्रं, अविलम्बितं, आशु, वेगतस्.

*To* EXPEL, *v. a.* (Banish) विवस् in caus. (-वासयति -यितुं), प्रवस्, निर्वस्, विप्रवस्; प्रव्रज् in caus. (-व्राजयति-यितुं), स्वदेशाद् वहिष्कृ or निराकृ or दूरीकृ.—(Drive away, eject, dismiss) निरस् (c. 4. -अस्यति -असितुं), अपास्, उदस्, निःसृ in caus. (-सारयति -यितुं), उत्सृ, अपसृ, निःसरणं कृ, अपानुद् (c. 6. -नुदति -नोत्तुं), निष्कस् in caus. (-कासयति -यितुं), निराकृ, वहिष्कृ, वहिःकृ, दूरीकृ, निष्क्रम् in caus. (क्रामयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिक्षिप्, निर्धू (c. 5. -धूनोति -धवितुं), भ्रंश् in caus. (भ्रंशयति -यितुं) च्यु in caus. (च्यावयति -यितुं).

EXPELLED, *p. p.* निर्वासितः -ता -तं, विवासितः -ता -तं, प्रवासितः -ता -तं, स्वदेशवहिष्कृतः -ता -तं, निरस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निःसारितः -ता -तं, निष्क्रामितः -ता -तं, वहिष्कृतः -ता -तं, वहिःकृतः -ता -तं, निःकासितः -ता -तं, उदस्तः -स्ता -स्तं, अवकृष्टः -ष्टा -ष्टं, निर्धूतः -ता -तं, अवधूतः -ता -तं, च्यावितः -ता -तं; 'from society,' अपपातितः -ता -तं, अवपातितः -ता -तं, अपांक्तः -क्ता -क्तं.

EXPELLER, *s.* निर्वासनकारी *m.* (न्), अपसारकः, अपनोदकः, नुदः in comp.

*To* EXPEND, *v. a.* (Disburse) व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं, rt. इ), व्ययीकृ, त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 6. -सृजति -स्रष्टुं), विनियुज् (c. 7. -युंक्ते -योक्तुं), अपचि (c. 5. -चिनोति -चेतुं).—(Lay out, consume) उपयुज् (c. 7. -युनक्ति -युंक्ते), प्रयुज्.—(Waste) विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षि (c. 1. क्षयति, c. 5. क्षिणोति or caus. क्षपयति -यितुं), उपक्षि, क्षयं कृ.

EXPENDED, *p. p.* व्ययितः -ता -तं, व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, अपचितः -ता -तं, विसर्ज्जितः -ता -तं, क्षयितः -ता -तं, विनियुक्तः -क्ता -क्तं, प्रयुक्तः -क्ता -क्तं.

EXPENDITURE, EXPENSE, *s.* व्ययः, धनव्ययः, अपव्ययः, व्ययीकरणं, अपचयः, अपचितिः *f.*, विसर्गः, उत्सर्गः -र्ज्जनं, त्यागः, परित्यागः, अर्थोत्सर्गः, अर्थत्यागः, क्षयः, उपक्षयः, संक्षयः, अवक्षयः, मोक्षणं, क्षेपः, विनियोगः, अपहारः, त्ययः; 'income and expenditure,' आयव्ययौ.

EXPENSELESS, *a.* निर्मूल्यः -ल्या -ल्यं, निर्व्ययः -या -यं, अल्पमूल्यः -ल्या -ल्यं.

EXPENSIVE, *a.* (Costly) बहुमूल्यः -ल्या -ल्यं, बहुव्ययः -या -यं, बहुधनव्ययेन or बहुमूल्येन क्रेयः -या -यं or साध्यः -ध्या -ध्यं, महार्घः -र्घा -र्घं, दुर्मूल्यः -ल्या -ल्यं, महार्हः -र्हा -र्हं, महाधनः -ना -नं, अर्घ्यः -र्घ्या -र्घ्यं.—(Extravagant) व्ययी -यिनी -यि (न्), अतिव्ययी &c., अपरिमितव्ययी &c., व्ययशीलः -ला -लं, अर्थनाशी -शिनी -शि (न्), अपचेता -त्री -तृ (तृ).

EXPENSIVELY, *adv.* बहुधनव्ययेन, बहुमूल्येन, बहुव्ययपूर्व्वं.

EXPENSIVENESS, *s.* बहुमूल्यता, दुर्मूल्यता, महार्घता, महार्घ्यं.—(Extravagance) अतिव्ययः, महाव्ययः, बहुव्ययः, अर्थदूषणं.

EXPERIENCE, *s.* (Trial) परीक्षा -क्षणं, अनुभवः.—(Use, practice) अभ्यासः, पूर्व्वाभ्यासः, अभ्यसनं, उपभोगः, भोगः, भुक्तिः *f.*, आचारः.—